Shri Raghunatha Temple MSS. Library,
JAMMU

No. ५६६८ - घ

Title श्रीमद् स्वर पादुका स्मृतिः

Author +

Extent ३ Age +

Subject तन्त्रम् . संपूर्णम्

© Dharmartha Trust J&K. Digitized by eGangotri

#5668

F—3

1

Complete — Dharm

नं० ५६६८-ध

श्रीसमुद्रपारयात्रास्मृतिः (उन्नाम)

पत्राणि ३ (त्रीणि) (संपूर्णम्)

नं० १२०८

© Dharmartha Trust J&K. Digitized by eGangotri

नं० १२८८ क
श्रीमद्गुरुवरपादुकास्तुतिः

श्रीमद्गुरुवरपादुकास्तुतिः

© Dharmartha Trust J&K. Digitized by eGangotri

गु·पा·
१

ॐश्रीगुरवेशिवायोंनमः ॐनमोविघ्नहर्त्रेसिद्धिकर्त्रेनमः हेरंबंक्षेत्रपा
लंचवागीशंवटुकंतथा श्रीगुरुंनाथमानंदभैरवंभैरवींपरां १ प्रण
म्यसंविन्मार्गस्थानागमज्ञान्गुरूत्तमान् प्रायश्चित्तंप्रवक्ष्यामिस
र्वतंत्राविरोधतः २ साधकानांचपुत्राणांदीक्षितानांशिवागमे योगि
नीवीरमेलापेप्रसादःसुलभःखलु ३ मनसश्चंचलत्वाच्चसत्वहीनत
यापिच कामिनीनांचसंसर्गात्कर्महीनाश्चकालतः प्रायश्चित्तवि
हीनस्यफलभोगायकेवलं सर्वसाक्षीमहादेवोनरकानसृजत्प्रभुः
तस्मात्सर्वप्रयत्नेनप्रायश्चित्तमिहैवतु कृतस्यकर्मणःकुर्यादनुता
पोभवेद्यदि ६ प्राणादिकमहादोषप्रविलापनकारणं प्रायश्चित्तंपरं
सत्यंश्रीगुरोःपादुकास्मृतिः ७ यस्यश्रीपादरजसारंजतेमस्तकेशिवः

© Dharmartha Trust J&K. Digitized by eGangotri

रमतेसहपार्वत्यातस्यश्रीपादुकास्तुतिः ८ योमोहतमसाक्रांतमुद्ध
रेदंधकूपतः केवलंकृपयानाथः तस्यश्रीपादुकास्तुतिः ९ यस्य
त्रैलोक्यमखिलंसच्चिदानंदलक्षणं पूर्यतेस्वगुणैःशक्त्यातस्यश्रीपा
दुकास्तुतिः १० यस्मैसर्वस्वमात्मानमप्येकीकृत्यभक्तितः समर्पय
तितच्छिष्यस्तस्यश्रीपादुकास्तुति ११ यमाश्रित्यात्मविज्ञानसंविदे
मृगयामहे हेतुकंदुःखितामूर्खास्तस्यश्रीपादुकास्तुतिः १२ यस्मि
न्सृष्टिस्थितिध्वंसपिधानानुग्रहात्मकं प्रकाशतेपंचकृत्यंतस्यश्री
पादुकास्तुतिः १३ मूलेहृदिललाटेचद्वादशांतेपरःशिवः यस्याज्ञा
मात्रमापन्नस्तस्यश्रीपादुकास्तुतिः १४ अत्यंतदृढभेदस्ययशोःपा
शविमोचनं यमाज्ञःशांभवीवाचस्तस्यश्रीपादुकास्तुतिः १५ यस्य

© Dharmartha Trust J&K. Digitized by eGangotri

पादतलेसिंधुःपादाग्रेकुलपर्वताः गुल्फेनक्षत्रवृंदानितस्यश्रीपा
दुकास्मृतिः १६ वनस्पतिस्तथारोमाणिशतरुद्राश्चजंघयोः जान्वोश्च
क्षेत्रसंदोहस्तस्यश्रीपादुकास्मृतिः १७ ऊर्वोश्चसिद्धवीरेंद्रालिंगमूले
चभैरवाः लिंगाग्रेप्सरसोयस्यश्रीपादुकास्मृतिः १८ आधारेपरमा
शक्तिर्नाभिचक्रेहृदाख्ययोः योगिनीनांचतुःषष्टिस्तस्यश्रीपादुका
स्मृतिः १९ हृदयेमातरःकंठेशिरेःपीठोपपीठयोः चिबुकेयस्यदे
वाश्चतस्यश्रीपादुकास्मृतिः २० यक्षाःकपोलयुग्मेचजिह्वाग्रेचसर
स्वती यस्यदंतेषुमंत्राश्चतस्यश्रीपादुकास्मृतिः २१ स्कंधेचखेचरा
देवानेत्रेचतेजसांत्रयं लिंगत्रयंललाटेचतस्यश्रीपादुकास्मृतिः २२
इडापिंगलयोरंतर्गंगाचयमुनातथा मध्येसरस्वतीयस्यतस्यश्रीपादुका

© Dharmartha Trust J&K. Digitized by eGangotri

स्मृतिः २३ सुल्लारन्तपदद्वंद्वंमस्तकेयस्यराजते शांभवंचतयोर्मध्येत
स्यश्रीपादुकास्मृतिः २४ गुरुःशिवोगुरुर्विष्णुर्गुरुर्ब्रह्मागुरुःपरः गु
रुरग्निर्गुरुर्मंत्रोभानुरिंद्रस्तथैवच २५ अन्यत्सर्वंसप्रपंचंनिष्प्रपंचा
गुरुस्तुतिः तस्माच्छ्रीपादुकाध्यानंसर्वपापनिकृंतनं २६ पालनाद्दुरि
तच्छेदात्कामितार्थप्रपूरणात् पादुकाशब्दमात्रार्थांविमृषन्मूर्ध्निपू
जयेत् इतिशास्त्रार्थसंकेतरहस्यंकुलशासने शाक्तपुल्लासवशाद्दक्तम
स्माभिर्गुर्वनुग्रहात् २७ श्रीगुरोःपादुकास्तोत्रंप्रातरुत्थाययःपठेत्
नश्यंतिसर्वपापानिवह्निनातूलराशिवत् पठितव्यंप्रयत्नेनश्रोतव्यंभ
क्तिशालिभिः भोगमोक्षार्थिभिस्तस्मात्सद्भिरागमपारगैः २ः इति
श्रीमद्गुरुवरपादुकास्मृतिःसमाप्ताः ॥ ॥ ॥

© Dharmartha Trust J&K. Digitized by eGangotri

गु॰ पा॰
३
3

© Dharmartha Trust J&K. Digitized by eGangotri

© Dharmartha Trust J&K. Digitized by eGangotri